योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ७९

एकोनाशीतितमः सर्गः ७९

श्रीराम उवाच ।

योगयुक्तस्य चित्तस्य शम एव निरूपितः ।

सम्यग्ज्ञानमिदानीं मे कथयानुग्रहात्प्रभो ।। १

श्रीवसिष्ठ उवाच ।

अनाद्यन्तावभासात्मा परमात्मेह विद्यते ।

इत्येको निश्चयः स्फारः सम्यग्ज्ञानं विदुर्बुधाः ।। २

इमा घटपटाकाराः पदार्थशतपङ्क्तयः ।

आत्मैव नान्यदस्तीति निश्चयः सम्यगीक्षणम् ।। ३

असम्यग्वेदनाज्जन्म मोक्षः सम्यगवेक्षणात् ।

असम्यग्वेदनाद्रज्जुः सर्पो नो सम्यगीक्षणात् ।। ४

संकल्पांशविनिर्मुक्ता संवित्संवेद्यवर्जिता ।

संवित्त्याभिसमाख्याता मुक्तावस्तीह नेतरत् ।। ५

सा शुद्धरूपा विज्ञाता परमात्मेति कथ्यते ।

शुद्धा त्वशुद्धरूपान्तरविद्येत्युच्यते बुधैः ।। ६

संवित्तिरेव संवेद्यं नानयोर्द्वित्वकल्पना ।

चिनोत्यात्मानमात्मैव रामैवं नान्यदस्ति हि ।। ७

यथाभूतात्मदर्शित्वमेतावद्भुवनत्रये ।

यदात्मैव जगत्सर्वमिति निश्चित्य पूर्णता ।। ८

सर्वमात्मैव कौ दिष्टौ भावाभावौ क्व च स्थितौ ।

क्व बन्धमोक्षकलने किमन्यद्राम शोच्यते ।। ९

न चेत्यमन्यन्नो चित्तं ब्रह्मैवेदं विजृम्भते ।

सर्वमेकं परं व्योम को मोक्षः कस्य बन्धता ।। १०

ब्रह्मेदं बृंहिताकारं वृहद्बृहदवस्थितम् ।

ज्ञानादस्तमितद्वित्वं भवात्मैव त्वमात्मना ।। ११

सम्यगालोकिते रूपे काष्ठपाषाणवाससाम् ।

मनागपि न भेदोऽस्ति क्वासि संकल्पनोन्मुखः ।। १२

आदावन्ते च संशान्तं स्वरूपमविनाशि यत् ।

वस्तु नामात्मनश्चैव तन्मयो भव राघव ।। १३

परं व्योमेदमखिलं जगत्स्थावरजङ्गमम् ।

सुखदुःखक्रमः कुत्र विज्वरो भव राघव ।। १४

द्वैताद्वैतसमुद्भूतैर्जरामरणविभ्रमैः ।

स्फुरत्यात्मभिरात्मैव चित्रैरम्ब्विव वीचिभिः ।। १५

शुद्धमात्मानमालिङ्ग्य नित्यमन्तस्थया धिया ।

यः स्थितस्तं क आत्मेहं भोगा बन्धयितुं क्षमाः ।। १६

कृतस्फारविचारस्य मनोभोगादयोऽरयः ।

मनागपि न भिन्दन्ति शैलं मन्दानिला इव ।। १७

अविचारिणमज्ञानं मूढमाशापरायणम् ।

निगिरन्तीह दुःखानि बका मत्स्यमिवाजलम् ।। १८

जगदात्मैव सकलमविद्या नास्ति कुत्रचित् ।

इति दृष्टिमवष्टभ्य सम्यग्रूपः स्थिरो भव ।। १९

नानात्वमस्ति कलनासु न वस्तुतोऽन्त-

र्नानाविधासु सरसीषु जलादि नान्यत् ।

इत्येकनिश्चयमयः पुरुषो विमुक्त

इत्युच्यते समवलोकितसम्यगर्थः ।। २०

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषूपशमप्रकरणे सम्यग्ज्ञानलक्षणनिरूपणं

नामैकोनाशीतितमः सर्गः ।।७९।।